# श्रीसत्याभिज्ञतीर्थस्तोत्रम्

सत्यध्यानाप्तसद्विद्यः सत्यप्रज्ञकराब्जजः ।
सत्यप्रमोदसुगुरुः सत्याभिज्ञोऽवतात्सदा ॥१॥

जिग्ये पद्मावतीक्षेत्रे महामीमांसकं तु यः ।
गुर्वनुग्रहसामर्थ्यात् सत्याभिज्ञोऽवतात्सदा ॥२॥

सिन्धौ निमज्जमाना नौः रामपेटिकया युता ।
रक्षिता यत्तपःशक्त्या सत्याभिज्ञोऽवतात्सदा ॥३॥

नवरात्रे कुम्भकोणे नारीं भूतादमूमुचत् ।
तीर्थाक्षतादिदानेन सत्याभिज्ञोऽवतात्सदा ॥४॥

ज्ञानभक्तिदयाक्षान्तिविनयादिविभूषितः ।
शान्तमूर्तिः परगुरुः सत्याभिज्ञोऽवतात्सदा ॥५॥

सत्यात्मभिक्षुरचितं गुरुस्तोत्रं पठेत्तु यः ।
सर्वाभीष्टमवाप्नोति गुर्वनुग्रहशक्तितः ॥६॥

॥ इति श्रीसत्याभिज्ञतीर्थस्तोत्रम् ॥